# फिलोमोनं पत्रं

I ख्रीष्टस्य यीशो र्बन्दिदासः पौलस्तीथियनामा भ्राता च
प्रियं सहकारिणं फिलीमोनं
II प्रियाम् आप्पियां सहसेनाम् आर्खिप्पं फिलीमोनस्य गृहे
स्थितां समितिञ्च प्रति पत्रं लिखतः।
III अस्माकं तात ईश्वरः प्रभु र्यीशुख्रीष्टश्च युष्मान् प्रति
शान्तिम् अनुग्रहञ्च क्रियास्तां।
IV प्रभुं यीशुं प्रति सर्व्वान् पवित्रलोकान् प्रति च तव
प्रेमविश्वासयो र्वृत्तान्तं निशम्याहं
V प्रार्थनासमये तव नामोच्चारयन् निरन्तरं ममेश्वरं धन्यं
वदामि।
VI अस्मासु यद्यत् सौजन्यं विद्यते तत् सर्व्वं ख्रीष्टं यीशुं
यत् प्रति भवतीति ज्ञानाय तव विश्वासमूलिका दानशीलता यत्
सफला भवेत् तदहम् इच्छामि।
VII हे भ्रातः, त्वया पवित्रलोकानां प्राण आप्यायिता
अभवन् एतस्मात् तव प्रेम्नास्माकं महान् आनन्दः सान्त्वना च
जातः।
VIII त्वया यत् कर्त्तव्यं तत् त्वाम् आज्ञापयितुं यद्यप्यहं
ख्रीष्टेनातीवोत्सुको भवेयं तथापि वृद्ध
IX इदानीं यीशुख्रीष्टस्य बन्दिदासश्चैवम्भूतो यः पौलः
सोऽहं त्वां विनेतुं वरं मन्ये।
X अतः शृङ्खलबद्धोऽहं यमजनयं तं मदीयतनयम् ओनीषिमम्
अधि त्वां विनये।
XI स पूर्व्वं तवानुपकारक आसीत् किन्त्विदानीं तव मम चोपकारी
भवति।
XII तमेवाहं तव समीपं प्रेषयामि, अतो मदीयप्राणस्वरूपः स
त्वयानुगृह्यतां।

XIII सुसंवादस्य कृते शृङ्खलबद्धोऽहं परिचारकमिव तं
स्वसन्निधौ वर्त्तयितुम् ऐच्छं।
XIV किन्तु तव सौजन्यं यद् बलेन न भूत्वा स्वेच्छाया: फलं
भवेत् तदर्थं तव सम्मतिं विना किमपि कर्त्तव्यं नामन्ये।
XV को जानाति क्षणकालार्थं त्वत्तस्तस्य विच्छेदोऽभवद्
एतस्यायम् अभिप्रायो यत् त्वम् अनन्तकालार्थं तं लप्स्यसे
XVI पुन र्दासमिव लप्स्यसे तन्नहि किन्तु दासात् श्रेष्ठं मम
प्रियं तव च शारीरिकसम्बन्धात् प्रभुसम्बन्धाच्च ततोऽधिकं
प्रियं भ्रातरमिव।
XVII अतो हेतो र्यदि मां सहभागिनं जानासि तर्हि मामिव
तमनुगृहाण।
XVIII तेन यदि तव किमप्यपराद्धं तुभ्यं किमपि धार्य्यते वा तर्हि
तत् ममेति विदित्वा गणय।
XIX अहं तत् परिशोत्स्यामि, एतत् पौलोऽहं स्वहस्तेन
लिखामि, यतस्त्वं स्वप्राणान् अपि मह्यं धारयसि तद् वक्तुं
नेच्छामि।
XX भो भ्रात:, प्रभो: कृते मम वाञ्छां पूरय ख्रीष्टस्य कृते
मम प्राणान् आप्यायय।
XXI तवाज्ञाग्राहित्वे विश्वस्य मया एतत् लिख्यते मया
यदुच्यते ततोऽधिकं त्वया कारिष्यत इति जानामि।
XXII तत्करणसमये मदर्थमपि वासगृहं त्वया सज्जीक्रियतां
यतो युष्माकं प्रार्थनानां फलरूपो वर इवाहं युष्मभ्यं दायिष्ये
ममेति प्रत्याशा जायते।
XXIII ख्रीष्टस्य यीशा: कृते मया सह बन्दिरिपाफ्रा
XXIV मम सहकारिणो मार्क आरिष्टार्खो दीमा लूकश्च त्वां
नमस्कारं वेदयन्ति।
XXV अस्माकं प्रभो र्यीशुख्रीष्टस्यानुग्रहो युष्माकम्
आत्मना सह भूयात्। आमेन्।

# Sanskrit Bible (NT) in Devanagari Script (सत्यवेदः।)

## New Testament in Sanskrit Language; printed in Devanagari Script

copyright © 2018 SanskritBible.in

Language: Sanskrit

Contributor: SanskritBible.in

Thank you for your interest in Sanskrit Bible.
Sanskrit Bible (NT) is freely available in 22 different scripts of your choice. This edition is in Devanagari script and is based on the Sanskrit translation of the Holy Bible published by Calcutta Baptist Missionaries in 1851. Please visit SanskritBible.in to learn more about Sanskrit Bible and to download various free Christian literature.

This translation is made available to you under the terms of the Creative Commons Attribution Share-Alike license 4.0.
You have permission to share and redistribute this Bible translation in any format and to make reasonable revisions and adaptations of this translation, provided that:

- You include the above copyright and source information.
- If you make any changes to the text, you must indicate that you did so in a way that makes it clear that the original licensor is not necessarily endorsing your changes.
- If you redistribute this text, you must distribute your contributions under the same license as the original.

Pictures included with Scriptures and other documents on this site are licensed just for use with those Scriptures and documents. For other uses, please contact the respective copyright owners.

Note that in addition to the rules above, revising and adapting God's Word involves a great responsibility to be true to God's Word. See Revelation 22:18-19.

2020-01-01

---

PDF generated using Haiola and XeLaTeX on 22 Feb 2024 from source files dated 29 Jan 2022
b86351f0-254a-576d-aa84-ea19df4455cb